# Rishigautamaproktam Shivanamamarmopadesham

# ઋષિગૌતમપ્રોક્તં શિવનામમર્મોપદેશમ્

## Document Information

Text title : Rishigautamaproktam Shivanamamarmopadesham

File name : shivanAmamarmopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 23| 182-197.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 20, 2024

*sanskritdocuments.org*

# ઋષિગૌતમપ્રોક્તં શિવનામમર્મોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
તેનૈવોચ્ચાર્યતે ભક્ત્યા શિવનામ શિવપ્રદમ્ ।
કૃતાનિ રત્નદાનાનિ સત્પાત્રે યેન ભૂરિશઃ ॥ ૧૮૨॥

તેનૈવોચ્ચાર્યતે ભક્ત્યા શિવનામ શિવપ્રદમ્ ।
કૃતાનિ હેમદાનાનિ સત્પાત્રે યેન ભૂરિશઃ ॥ ૧૮૩॥

તેનૈવોચ્ચાર્યતે ભક્ત્યા શિવનામ શિવપ્રદમ્ ।
કૃતાનિ કન્યાદાનાનિ સત્પાત્રે યેન ભૂરિશઃ ॥ ૧૮૪॥

તેનૈવોચ્ચાર્યતે ભક્ત્યા શિવનામ શિવપ્રદમ્ ।
કૃતાનિ ગજદાનાનિ સત્પાત્રે યેન ભૂરિશઃ ॥ ૧૮૫॥

તેનૈવોચ્ચાર્યતે ભક્ત્યા શિવનામ શિવપ્રદમ્ ।
કૃતાનિ ગોપ્રદાનાનિ સત્પાત્રે યેન ભૂરિશઃ ॥ ૧૮૫॥

તેનૈવોચ્ચાર્યતે ભક્ત્યા શિવનામ શિવપ્રદમ્ ।
શિવપઞ્ચાક્ષરી વિદ્યા બ્રહ્મવિદ્યેતિ ગીયતે ॥ ૧૮૭॥

સા વિદ્યા શિવરૂપૈવ મુક્તિદા જપતાં નૃણામ્ ।
વિદ્યાનામુત્તમા વિદ્યા વેદવિદ્યેતિ ગીયતે ॥ ૧૮૮॥

તત્રાપિ વેદવિદ્યાયાં શ્રીરુદ્રાધ્યાયમુત્તમમ્ ।
તત્રાપ્યત્યુત્તમા વિદ્યા શિવપઞ્ચાક્ષરાત્મિકા ॥ ૧૮૯॥

સૈવ વિદ્યા મહાવિદ્યા મોક્ષવિદ્યેતિ ગીયતે ।
લોકાનાં પ્રલયે પ્રાપ્તે લોકા વેદે લયં ગતાઃ ॥ ૧૯૦॥

તતઃ સર્વેઽપિ વેદાસ્તે રુદ્રાધ્યાયે લયં ગતાઃ ।
રુદ્રાધ્યાયો લયં પ્રાપ્તઃ શિવપઞ્ચાક્ષરે તતઃ ॥ ૧૯૧॥

શિવપઞ્ચાક્ષરઃ શુદ્ધો ન કુત્રાપિ વિલીયતે ।

શિવપઞ્ચાક્ષરો નામ બ્રહ્મવિદ્યેતિ કથ્યતે ॥ ૧૯૨॥

ન પરબ્રહ્મણો નાશઃ કદાચિદપિ વસ્તુતઃ ।
પરમ્બ્રહ્મેતિ વિજ્ઞેયં શિવ ઇત્યક્ષરદ્વયમ્ ॥ ૧૯૩॥

તદ્બ્રહ્મેતિ વિદિત્વૈવ તદુપાસ્યં મુમુક્ષુભિઃ ।
તદ્ધિ બ્રહ્મેત્યુપાસીત ભવતિ બ્રહ્મવાંસ્તતઃ ॥ ૧૯૪॥

બ્રહ્મવાન્બ્રહ્મવિદ્ભૂત્વા બ્રહ્મભૂતો હિ જાયતે ।
પઞ્ચાક્ષરાત્મકં બ્રહ્મ જ્ઞેયં બ્રહ્મેતિ વૈદિકૈઃ ॥ ૧૯૫॥

ન તદ્બ્રહ્મેદિ વિજ્ઞાય પ્રાપ્નોતિ નરકં ધ્રુવમ
અવ્યક્તં પરમં બ્રહ્મ શિવ ઇત્યક્ષરદ્વયમ્ ॥ ૧૯૬॥

તદેવ સર્વવેદાન્તૈઃ પ્રતિપાદ્ય ન સંશયઃ । ૧૯૭.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિગૌતમપ્રોક્તં શિવનામમર્મોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૩। ૧૮૨-૧૯૭.૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 23 . 182-197.1..

Notes:

Ṛṣi Gautama ઋષિ ગૌતમ delivers Upadeśa ઉપદેશ about the merits of reciting the ŚivaNāma શિવનામ with devotion. He mentions that the Śiva Pañcākṣarī Vidyā શિવ પઞ્ચાક્ષરી વિદ્યા is indeed BrahmaVidyā બ્રહ્મવિદ્યા.

He further elaborates that amongst all Vidyā-s, VedaVidyā વેદવિદ્યા is the best; and among the Veda-s વેદાઃ, there is the magnificent Rudrādhyāya રુદ્રાધ્યાય in which is mentioned the Supreme Śiva Pañcākṣarī Vidyā શિવ પઞ્ચાક્ષરી વિદ્યા - and that is known as the MahāVidyā મહાવિદ્યા and the MokṣaVidyā મોક્ષવિદ્યા. While the worlds merge into the Veda-s વેદાઃ, the latter merge into Rudrādhyāya રુદ્રાધ્યાય - which itself merges into the Śiva Pañcākṣara શિવ પઞ્ચાક્ષર - which is Pure and does not merge into anything.

Ṛṣi Gautama ઋષિ ગૌતમ explains that Śiva Pañcākṣara શિવ પઞ્ચાક્ષર is the Eternal Brahma બ્રહ્મ; and the two syllabled name (DvayakṣaraNāma દ્વયક્ષરનામ) "Śiva શિવ" is the Unmanifest (Avyakta) Parama Brahma અવ્યક્ત પરમ બ્રહ્મ.

In later part of the chapter, Ṛṣi Gautama ઋષિ ગૌતમ shares that this ParamāVidyā પરમાવિદ્યા was understood by Śivā શિવા, and with due instruction from Mahādeva મહાદેવ the same was passed on by Her to Her Son Ṣaṇmukha ષણ્મુખ who further passed it on to Nandikeśa

નન્દિકેશ. It was subsequently passed on to Ṛṣi Agastya ઋષિ અગસ્ત્ય who expounded it to him (Ṛṣi Gautama ઋષિ ગૌતમ).
Mahādevaproktaṃ ŚivaNāmaMarmopadeśam મહાદેવપ્રોક્તં શિવનામમર્મોપદેશમ્ can be referred to in one of the links given below.

Proofread by Ruma Dewan

---

*Rishigautamaproktam Shivanamamarmopadesham*
pdf was typeset on June 20, 2024

Please send corrections to *sanskrit@cheerful.com*